## यस्य विभाषा। (१५/३०२५)

यस्य [1]धातोः विभाषा क्वचिदिड् उक्तः तस्य निष्ठायां परतः इडागमो[2] न भवति। वक्ष्यति – 'स्वरतिसूतिसूयतिधूञूदितो वा' (७.२.४४/२२७९)। [3]विधूतः। विधूतवान्। गुहू – गूढः। गूढवान्। उदितो वा (७.२.५६/३३२८) – वृधु–वृद्धः। वृद्धवान्। तनिपतिदरिद्राणामुपसङ्ख्यानम् इति पते[4]र्विभाषितेट्कस्यापि 'द्वितीयाश्रितातीतपतित' (२.१.२४/६८६) इति निपातनात् इडागमः[5]॥

## आदितश्च। (१६/३०३६)

आदितश्च धातोर्निष्ठायामिडागमो न भवति। ञिमिदा (धा. पा. १२४४) – मिन्नः। मिन्नवान्। [6]ञिक्ष्विदा (धा. पा. १२४५) – क्ष्विण्णः। क्ष्विण्णवान्। ञिष्विदा (धा. पा. ७४४) – स्विन्नः। स्विन्नवान्। चकारोऽनुक्तसमुच्चयार्थः। आश्वस्तः। वान्तः[7]।

योगविभागकरणं किमर्थम्, आदितश्च विभाषा भावादिकर्मणोः [8]इत्येवं [9]पठितव्यम्, अन्यत्र हि भावादिकर्मभ्यां 'यस्य विभाषा' (७.२.१५/३०२५) इति प्रतिषेधो भविष्यति? [10]ज्ञापनार्थमेतत्। ज्ञापयति – यदुपाधेर्विभाषा तदुपाधेः प्रतिषेधः (म. भा. ३.२८६) इति। तेन 'विभाषा गमहनविदविशाम्' (७.२.६८/३०९९) इत्यत्र[11] विदेर्लाभार्थस्य विभाषा इति ज्ञानार्थस्य प्रतिषेधो न भवति। विदितः[12]। विदितवान्॥

## विभाषा भावादिकर्मणोः। (१७/३०५४)

[13]भावे आदिकर्मणि च आदितो धातोः [14]विभाषा निष्ठायामिडागमो [15]न भवति। [16]मिन्नमनेन, मेदितमनेन। प्रमिन्नः, प्रमेदितः। सौनागाः कर्मणि निष्ठायां शकेरिटमिच्छन्ति विकल्पेन। शकितो घटः कर्तुम्, शक्तो घटः कर्तुम्। [17]भावे न भवत्येव, शक्तमनेन। अस्यतेर्भावे, असितमनेन। आदिकर्मणि च न भवत्येव, [18]अस्तः काण्डः॥

## क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु। (१८/३०५८)

क्षुब्ध स्वान्त ध्वान्त लग्न म्लिष्ट विरिब्ध फाण्ट बाढ इत्येते निपात्यन्ते यथासङ्ख्यं मन्थ मनः तमः सक्त अविस्पष्ट स्वर अनायास भृश इत्येतेष्वर्थेषु। [19]क्षुब्ध इति भवति मन्थाभिधानं चेत्। क्षुब्धो मन्थः। [20]क्षुभितम्

1. धातोः नास्ति इ. 2. नित्यम् इत्यधिकम् फ. 3. धोता धविता इत्यधिकम् ह, स्वृतः स्वृतवान् सूतिः सूयतिः सूतः सूतवान् धूतः धूतवान् इत्यधिकम् इ. 4. विभाषितेटोऽपि क. 5. भवति इत्यधिकम् क. 6. नास्ति क. 7. इति इत्यधिकम् क. 8. इत्येकयोगेनैव सिद्धम् क. 9. वक्तव्यम् ब. 10. तत् क्रियते ज्ञापनार्थम् क. 11. विशिना तौदादिकेन साहचर्यात् इत्यधिकम् ब. 12. विदित्वा इत्यधिकम् इ. 13. आदितः इति वर्तते इत्यधिकम् क. 14. विभाषा नास्ति क. 15. वा क. 16. पूर्वेण प्रतिषेधे प्राप्ते विकल्पार्थं च वचनम् इत्यधिकम् क. 17. भावे – काण्डः नास्ति क. 18. अस्तः काण्डः नास्ति ह. 19. क्षुभ सञ्चालने इत्यधिकम् ह. 20. क्षुभितोऽन्यः क्षुभितमनेन क.

THE SANSKRIT LIBRARY FAIRFIELD, IA 52556